# ॥ मन्त्रिणी षोडश नामानि॥

॥ ध्यानम् ॥

माणिक्यवीणामुपलाळयन्तीं

मदालसां मञ्जुळवाग्विलासाम्।

माहेन्द्रनीलद्युतिकोमळाङ्गीं

मातङ्गकन्यां मनसा स्मरामि ॥ १॥

चतुर्भुजे चन्द्रकलावतंसे

कुचोन्नते कुङ्कुमरागशोणे।

पुण्ड्रेक्षुपाशाङ्कुशपुष्पबाण-

हस्ते नमस्ते जगदेकमातः ॥ २॥

॥ नामानि ॥

१. ॐ संगीतयोगिन्यै नमः।

२. ॐ श्यामायै नमः।

३. ॐ श्यामळायै नमः।

४. ॐ मन्त्रनायिकायै नमः।

५. ॐ मन्त्रिण्यै नमः।

६. ॐ सचिवेशान्यै नमः।

७. ॐ प्रधानेश्यै नमः।

८. ॐ शुकप्रियायै नमः।

९. ॐ वीणावत्यै नमः।

१०. ॐ वैणिक्यै नमः।

११. ॐ मुद्रिण्यै नमः।

१२. ॐ प्रियकप्रियायै नमः।

१३. ॐ नीपप्रियायै नमः।

१४. ॐ कदम्बेश्यै नमः।

१५. ॐ कदम्बवनवासिन्यै नमः।

१६. ॐ सदामदायै नमः॥